बिस् 4. P. to go, to throw, to instigate, बिस्यति pre. बिबेस perf.

बुक् 1 P. & 10 U. to bark, to speak, बुक्कति & बुक्कयति–ते pre.

बुद् 1 U. to see, to understand. बोदति–ते pre. बुबोद or बुबुदे perf.

बुध् 1 U. to know, to mark, to esteem बोधति–ते pre. बुबोध & बुबुधे perf. बोधिता p. fut. बोधिष्यति–ते fut. अबोधिष्यत्–त con. अबुधत्, अबोधीत् & अबोधिष्ट aor. Cau:—बोधयति–ते pre. अबूबुधत्–त aor.

बुध् 4 A. to know, to understand. बुध्यते pre. बुबुधे perf. बोद्धा p. fut. भोत्स्यते fut. अभोत्स्यत con. अबुद्ध or अबोधि aor. भुत्सीष्ट ben. बुबुत्सते des. Pass. बुध्यते pre. Cau. बोधयति–ते pre. बुद्ध pp.

बुल् 10. U. to sink, to plunge बोलयति–ते pre. बोलयांचकार–चक्रे perf. बोलयिता p. fut.

बुस् 4 P. to discharge, to emit बुस्यति pre. बुबोस perf.

बुस्त् 10 U. to honour, to treat honourably बुस्तयति–ते pre. बुस्तयांचकार–चक्रे perf. बुस्तयिता p. fut.

बृह् 1 P. to grow, to increase बर्हति pre. बबर्ह perf. बर्हिता p. fut. बर्हिष्यति fut. अबर्हिष्यत् con.

बेह् 1 A. to shine. बेहते pre.

ब्रू 2 U. to speak ब्रवीति, ब्रूते, आह pre. उवाच, ऊचे perf. वक्ता p. fut. वक्ष्यति–ते fut. अवक्ष्यत्–त con. अवोचत्–त aor. उच्यात् & वक्षीष्ट ben. Pass:—उच्यते pre. Cau:— वाचयति–ते pre. अवीवचत्–त aor. उक्त pp. उक्त्वा ger. वक्तुम् inf.

ब्रूस् 10 U. to kill, to hurt ब्रूसयति–ते pre. ब्रूसयांचकार–चक्रे. perf. ब्रूसयिता p. fut अबुब्रुसत्–त aor.

भ—

भक्ष् 10 U. to eat, to use up, to bite भक्षयति-ते pre. भक्षयांचकार—चक्रे-मास-बभूव perf. भक्षयिता p. fut. भक्षयिष्यति-ते fut. अबभक्षत्—त aor. भक्ष्यात् & भक्षयिषीष्ट ben. Pass. भक्ष्यते pre. भक्षित pp. भक्षयित्वा ger. भक्षयितुम् inf.

भज् 1 U. to share, to take possession of, to choose, to honour भजति—ते pre. बभाज & भेजे perf. भक्ता p. fut, भक्ष्यति—ते fut. अभक्ष्यत्—त con. अभाक्षीत् & अभक्त aor. भज्यात् & भक्षीष्ट ben. बिभक्षति—ते ben. Pass:—भज्यते pre. अभाजि aor. Cau:—भाजयति—ते pre. अबीभजत्—त aor. भक्त pp. भक्त्वा ger. भक्तुम् inf.

भज् 10 U. to cook, to give भाजयति—ते pre. भाजयांचकार—चक्रे &c. perf. भाजयिता p. fut. अबीभजत्—त aor.

भंज् 10 U. to illumine भंजयति —ते pre.

भञ्ज् 7 P. to split, to disappoint भनक्ति pre. बभञ्ज perf, भङ्क्ता p. fut. भङ्क्ष्यति fut. अभङ्क्ष्यत् con. अभांक्षीत् aor. भज्यात् ben. बिभङ्क्षति des. Pass:— भज्यते pre. अभञ्जि or अभाजि aor. Cau.—भञ्जयति—ते pre. अबभञ्जत्—त aor, भग्न pp. भक्त्वा-भङ्क्त्वा ger. भङ्क्तुम् inf.

भट् 1 P. to receive wages, to nourish भटति pre. बभाट perf. भटिता p. fut.

भट् 10 U. to speak भटयति—ते pre. भटयांचकार—चक्रे perf. भटयिता p. fut. अबीभटत्—त aor.

भड् 1 A. to upbraid, to jest भंडते pre. बभंडे perf. भण्डिता p. fut.

भण्ड् 10 U. to make, fortunate, to cheat भण्डयति–ते pre. भण्डयांचकार—चक्रे, perf. भण्डयिता p. fut. अबभण्डत्–त aor.

भण् 1 P. to speak, to call भणति pre. बभाण perf. भणिता p fut. भणिष्यति fut. अभणीत् or अभाणीत् aor. Pass:—भण्यते pre. अभाणि aor. भणित pp. भणित्वा ger.

भर्त्स् 10 U. (generally Atm.) to menace, to threaten, to abuse, to deride भर्त्सयति--ते pre. भर्त्सयांचकार--चक्रे perf. भर्त्सयिता p. fut. अबभर्त्सत्--त aor.

भल् 10 A. to see भालयते pre. भालयांचक्रे perf. भालयिता p. fut.

भल्ल् 1 A. to describe, to wound, to give भल्लते pre. बभल्ले perf. भल्लिता p. fut. अभल्लत aor. भल्लित pp.

भष् 1 P. to bark, to rail against भषति pre. बभाष perf. भषिता p. fut.

*भस् 3 P. to censure, to blame, to shine बभस्ति pre. बभास perf.

भा 2 P. to shine, to appear, to be भाति pre. बभौ perf. भाता p. fut. अभासीत् aor. Pass:—भायते pre. अभायि aor. Cau:—भापयति-- ते pre. अबीभपत्–त aor.

भाज् 10 U. to divide भाजयति–ते pre. भाजयांचकार—चक्रे perf. भाजयिता p. fut. अबभाजत्--त aor.

भाम् 1 A. to be angry. भामते pre.

भाष् 1 A. to say, to speak about, to call, भाषते pre. बभाषे perf. भाषिता p. fut. अभाषिष्ट aor.

---

* It is used in the Vedas only.

भिक्ष् 1 A. to beg, to obtain, भिक्षते pre. बिभिक्षे perf. भिक्षित p. fut. भिक्षिष्यति fut. अभिक्षिष्ट aor.

भिद् 1 P. to divide, to cut भिदति pre. बिभिन्द perf.

भिद् 7 U. to separate, to break down भिनत्ति & भिन्ते pre. बिभेद & बिभिदे perf. भेत्ता p. fut. भेत्स्यति-ते fut. अभेत्स्यत् -त con. अभिदत् & अभैत्सीत्, अभित्त aor. बिभित्सति des. भिन्न pp.

भी 3 P. to fear, to be anxious about बिभेति pre. बिभाय or बिभयांचकार perf. भेता p. fut. भेष्यति fut. अभेष्यत् Con. अभैषीत् aor. भीयात् ben. बिभीषति des. Pass:—भीयते pre. अभायि aor. Cau:—भाययति. भापयते or भीषयते pre. भीत pp.

भुज् 6 P. to bend, to curve भुजति pre. बुभोज perf. भोक्ता p. fut. अभौक्षीत् aor. भुग्न pp.

भुज् 7 U. to protect, (A.) to eat, to consume, to enjoy. (P) to rule, to govern भुनक्ति & भुंक्ते pre. बुभोज & बुभुजे perf. भोक्ता p. fut. भोक्ष्यति-ते fut. अभोक्ष्यत् त con. अभौक्षीत् & अभुक्त aor. भुज्यात् & भुक्षीष्ट ben. बुभुक्षति—ते des. Pass:—भुज्यते pre. अभोजि aor. Cau:—भोजयति—ते pre. अबूभुजत्—त aor. भुक्त pp.

भू 1 P. (rarely Atm.) to be, to live, to be born भवति-त pre. बभूव & बभूवे perf. भविता p. fut. भविष्यति—ते fut. अभविष्यत् —त con. अभूत् & अभविष्ट aor. भूयात् & भविषीष्ट ben. बुभूषति —ते des. Pass:—भूयते pre. भविता or भाविता p. fut. भविष्ये. भाविष्ये fut. अभावि aor. भाविषीष्ट or भविषीष्ट ben. Cau:— भावयाति-ते pre. अबीभवत्—त aor. भूत pp.

भू 10 A. to attain, to obtain भावयते pre. भावयांचक्रे perf. भावयिता p. fut. अबीभवत aor.

भू 10 U. to be purified, to consider, to mix, भावयति—ते pre. भावयांचकार—चक्रे perf. भावयिता p fut. अबीभवत्-त aor.

भूष् 1 P. to adorn भूषति pre. बुभूष perf.

भूष् 10 U. to adorn भूषयति-ते, pre. भूषयांचकार-चक्रे, &c. perf. भूषयिता p. fut. भूषित pp.

भृ 1 U. to nourish, to fill भरति-ते pre. बभार—बभ्रे perf. भर्ता p. fut. भरिष्यति—ते fut. अभार्षीत्, अभृत aor. बुभूर्षति—ते or बिभरिषति—ते des.

भृ 3 U. to hold, to support बिभर्ति & बिभृते pre. बभार & बभ्रे & बिभरांचकार—चक्रे, &c perf. भर्ता p. fut. भरिष्यति—ते fut. अभार्षीत् & अभृत aor. बिभरिषति or बुभूर्षति des. Pass-भ्रियते pre. अभारि aor. Cau:-भारयति—ते pre. अबीभरत्—त aor.

भृज् 1 A. to parch, to fry, भर्जते pre. बभर्जे perf. भर्जिता p. fut. अभर्जीत् aor.

भृश् 4 P. to fall down भृश्यति pre. बभर्श perf. भर्शिता p. fut.

भॄ 9 P. to fry, to reproach, to support भृणाति pre. बभार perf. भूर्ण pp.

भेष् 1 U. to be afraid, भेषति—ते pre.

भ्रंश् 1 A. & 4 P. to fall, to decline, to escape. भ्रंशते & भ्रश्यति pre. बभ्रंश बभ्रंशे perf. भ्रंशिता p. fut. अभ्रशत्—त aor. भ्रष्ट pp. भ्रंशित्वा & भ्रष्ट्वा ger.

भ्रंस् 1 A. & 4 P. to fall down भ्रंसते & भ्रस्यति pre. (same as भ्रंश् with the change of श् for स्).

भ्रक्ष् 1 U. to eat भ्रक्षति—ते pre. बभ्रक्ष perf. भ्रक्षिता p. fut.

भ्रण् 1 P. to sound भ्रणति pre. बभ्राण perf. भ्रणिता p. fut. अभ्रणीत् aor.

भ्रम् 1 & 4 P. to roam about, to totter, to surround भ्रमति &

भ्रम्यति, भ्राम्यति pre. बभ्राम perf. भ्रमिता p. fut. भ्रमिष्यति fut. (1 P.) अभ्रमीत् (4 P.) अभ्रमत् aor. भ्रान्त pp. भ्रमित्वा or भ्रान्त्वा ger. Cau:—भ्रमयति pre.

भ्रस्ज् 6 U. to fry, to parch भृज्जति—ते pre. बभ्रज्ज, बभर्ज & बभर्जे बभ्रज्जे, perf. भ्रष्टा or भर्ष्टा p. fut. भ्रक्ष्यति—ते or भर्क्ष्यति—ते fut. अभ्राक्षीत्, अभार्क्षीत् & अभ्रष्ट, अभर्ष्ट aor. भृज्ज्यात् & भ्रक्षीष्ट भर्क्षीष्ट ben. बिभ्रक्षति—ते, बिभर्क्षति—ते, बिभ्रज्जिषति—ते or बिभर्जिषति—ते des. Pass:—भृज्ज्यते pre. Cau:—भ्रज्जयति—ते or भर्जयति—ते pre. अबभ्रज्जत्—त or अबभर्ज्जत्—त aor. भृष्ट pp.

भ्राज् 1 A. to shine, to beam भ्राजते pre. बभ्राजे or भ्रेजे perf. भ्राजिता p. fut. भ्राजिष्यते fut. अभ्राजिष्ट aor. Cau. भ्राजयति—ते pre. Pass: भ्राज्यते pre. अभ्राजि aor. भ्राजित pp.

भ्राश् 1 & 4 A. to shine भ्राशते & भ्राश्यते pre. बभ्राशे or भ्रेशे perf. भ्राशिता p. fut. अभ्राशिष्ट aor.

भ्रास् 1 & 4 A. to shine भ्रासते & भ्रास्यते pre. बभ्रासे or भ्रेसे perf. भ्रासिता p. fut. अभ्रासिष्ट aor.

भ्री 9 P. to tear, to protect भ्रीणाति or भ्रिणाति pre.

भ्रुड् 6 P. to collect, to cover भ्रुडति pre. बुभ्रोड perf.

भ्रूण् 10 A. to put confidence in, to wish भ्रूणयते pre. भ्रूणयांचक्रे perf.

भ्रेज् 1 A. to shine, to glitter भ्रेजते pre.

भ्रेष् 1 U. to go, to be angry भ्रेषति—ते pre. बिभ्रेष & बिभ्रेषे perf.

भ्लक्ष् 1 U. to eat भ्लक्षति—ते pre. बभ्लक्ष & बभ्लक्षे perf.

भ्लक्ष् (see the root भ्रक्ष्)
भ्लाश् (see " भ्राश्)
भ्लास् (see " भ्रास्)
भ्लेष् (see " भ्रेष्)
} changing र् to ल्

म—

मंह् 1. A. to grow, to grant, to speak, to shine मंहते pre. ममंहे perf. मंहिता p. fut. अमंहीत् aor.

मंक् 1 A. to adorn, to move मंकते pre. ममंके perf. मंकिता p. fut. अमंकीत् aor.

मक् 1 A. to go, to move मकते pre. ममके perf. अमकीत् aor.

मक्ष् 1 P. to accumulate, to be angry मक्षति pre. ममक्ष perf. अमक्षीत् aor.

मख् 1 P. to go, to creep मखति pre. ममाख perf. मखिता p. fut. अमखीत् aor.

मंख् 1 P. to go मंखति pre. ममंख perf. मंखिता p. fut. अमंखीत् aor.

मंग् 1 U. to go, to move मंगति—ते pre. ममंग—गे perf. मंगिता p. fut. &c.

मंघ् 1 P. to adorn, to decorate मंघति pre. ममंघ perf. मंघिता p. fut. अमंघीत् aor.

मंघ् 1 A. to cheat, to begin, to censure, to move quickly, to start मघते pre. ममंघे perf. मंघिता p. fut. अमंघिष्ट aor.

मच् 1 A. to cheat, to be wicked, to be proud मचते pre. मेचे perf. मचिता p. fut. अमचिष्ट aor.

मंच् 1 A. to hold, to grow high, to go, to adore, to shine मंचते pre. ममंचे perf. मंचिता p. fut. अमंचिष्ट aor.

मंज् 10 U. to wipe off, to sound मंजयति—ते pre. मंजयांचकार-चके, &c. perf. मंजयिता p. fut. अमिमंजत्—त aor.

मड् 1 P. to dwell, to grind, to go मडति pre. ममाड perf. मडिता p. fut. अमडीत् aor.

ड् 1 A. to remember with regret, to long for मंडते pre. ममंडे perf. मंडिता p. fut. अमंडिष्ट aor.

ण् 1 P. to sound, to murmur मणति pre. ममाण perf. मणिता p. fut. अमणीत् aor.

ड् 1 P. to decorate मण्डति pre. ममण्ड perf. मण्डिता p. fut. मण्डिष्यति fut. अमंडीत् aor. मण्ड्यात् ben.

ड् 1 A. to surround, to distribute, to dress, मण्डते pre. ममण्डे perf. मण्डिता p. fut. मण्डिष्यते fut. अमण्डिष्ट aor. मण्डिषीष्ट ben. Pass:—मण्ड्यते pre. Cau:—मण्डयति-ते pre. अममण्डत्-त aor.

ड् 10 U. to adorn मण्डयति-ते pre. मण्डयांचकार—चक्रे, &c. perf. मण्डयिता p. fut. अममण्डत्-त aor.

4 P. to be drunk, to be mad, to be glad माद्यति pre. ममाद perf. मदिता p. fut. मदिष्यति fut. अमदीत्—अमादीत् aor. Cau.—मादयति pre. मत्त pp.

10 A. to please मादयते pre. मादयांचक्रे perf. मादयिता p. fut. अमीमदत aor. मादित pp.

1 P. to be proud, to be poor मदति pre. ममाद perf. मदिता p. fut. अमदीत् aor.

1 P. to be proud, to worship मनति pre. ममान perf. मनिता p. fut. अमनीत् aor.

4 A. to know, to think मन्यते pre. मेने perf. मन्ता p. fut. मंस्यते fut. अमंस्यत con. अमंस्त aor. मीमांसते des. Cau:—मानयति-ते pre. मत pp. मत्वा ger.

8 A. to consider, to esteem मनुते pre. मेने perf. मनिता p. fut. मनिष्यते fut. अमनिष्ट aor.

मन् 10 A. to be proud मानयते pre. मानयांचक्रे perf. मानयिता p. fut. अमीमनत aor.

मन्त्र् 10 A. to consult, to advice, to speak मन्त्रयते (sometimes मन्त्रयति also.) pre. मन्त्रयांचक्रे perf. मन्त्रयिता p. fut. मंत्रयिष्यते fut. अममन्त्रत aor. मन्त्रित pp. मन्त्रयित्वा ger.

मन्थ् 1 & 9 P. to churn, to agitate, to crush, to destroy, to tear off मन्थति & मथ्नाति pre. ममन्थ perf. मंथिता p. fut. मंथिष्यति fut. अमन्थीत् aor. मथ्यात् ben. मिमन्थिषति des. Pass:- मथ्यते pre. Cau:—मन्थयति—ते pre. अममन्थत्—त aor. मथित pp. मन्थित्वा—मथित्वा ger.

मथ् 1 P. to churn, to stir मथति pre. ममाथ perf. मथिता p. fut. मथिष्यति fut. अमथीत् aor. Pass. मथ्यते pre. अमाथि aor. मथित pp. मथित्वा ger.

मन्द् 1 A. to be drunk, to be glad, to languish, to shine, to loiter, to praise or be praised, to sleep मन्दते pre. ममन्दे perf. मन्दिता p. fut. मन्दिष्यते fut. अमन्दिष्ट aor.

मभ्र् 1 P. to go, to move मभ्रति pre. ममभ्र perf. मभ्रिता p. fut. अमभ्रीत् aor.

मय् 1 A. to go, to move मयते pre. ममये perf. मयिता p. fut. अमयिष्ट aor.

मर्च् 10 U. to take, to sound, to go, to injure मर्चयति—ते pre. मर्चयांचकार—चक्रे, &c. perf. मर्चयिता p. fut. अमिमर्चत्—त aor.

मर्ब् 1 P. to go, to move मर्बति pre. ममर्ब perf. मर्बिता p. fu अमर्बीत् aor.

मर्व् 1 P. to go, to fill मर्वति pre. ममर्व perf. मर्विता p. fu अमर्वीत् aor. Cau.—to sound मर्वयति—ते pre.

मल् 1 A. & 10 U. to hold, to possess मलते & मलयति—ते pre. मेले & मलयांचकार—चक्रे, perf. मलिता & मलयिता p. fut. अमलिष्ट & अमीमलत्—त aor.

मल्ल् 1 A. to hold, to possess मल्लते pre.

मव् 1 P. to fasten, to bind मवति pre. ममाव perf. मविता p. fut. अमवीत् aor.

मश् 1 P. to buzz, to be angry मशति pre. ममाश perf. मशिता p. fut. अमशीत् aor.

मष् 1 P. to hurt, to destroy मषति pre. ममाष perf. मषिता p. fut. अमषीत् aor.

मस् 4 P. to weigh, to change form मस्यति pre. ममास perf. मसिता p. fut. अमसीत् aor.

मस्क् 1 P. to go, to move मस्कति pre. ममस्क perf. मस्किता p. fut. अमस्कीत् aor.

मस्ज् 6 P. to bathe, to sink, to purify मज्जति pre. ममज्ज perf. मङ्क्ता p. fut. मङ्क्ष्यति fut. अमाङ्क्षीत् aor. मज्ज्यात् ben. मिमंक्षति des. Cau:—मज्जयति—ते pre. अममज्जत्—त aor. मग्न pp.

मह् 1 P. & 10 U. to honour, to delight, to increase महति & महयति—ते pre. ममाह & महयांचकार—चक्रे, perf. महिता & महयिता p. fut. अमहीत् & अमीमहत्—त aor. महित pp.

मा 2 P. to measure, to limit, to compare with, to form, to show, &c. माति pre. ममौ perf. माता p. fut. मास्यति fut. अमास्यत् con. अमासीत् aor. मेयात् ben. मित्सति des. Pass:-मीयते pre. अमायि aor. Cau:—मापयति—ते pre. अमीमपत् —त aor. मित pp. मित्वा ger.

मा 3 & 4 A. to measure, &c. मिमीते & मायते pre. ममे perf.

माता p. fut. मास्यते fut. अमास्त aor. मासीष्ट ben. मित्सते des. &c.

मांक्ष् 1 P. to wish, to desire, मांक्षति pre.

मान् 1 A. to seek, knowledge, मीमांसते pre. मीमांसांबभूव--आस --चक्रे, perf. मीमांसिता p. fut. अमीमांसिष्ट aor. Pass:--मीमांस्यते pre. मीमांसित pp.

मांथ् 1 P. to hurt, to injure मांथति pre.

मार्ग् 1 P. to seek, to chase मार्गति pre. ममार्ग perf. मार्गिता p. fut. अमार्गीत् aor.

मार्ग् 10 U. to seek for, to go, to decorate, मार्गयति—ते pre. मार्गयांचकार—चक्रे, &c. perf. मार्गयिता p. fut. अममार्गत्—त aor. मार्गित pp.

मार्ज् 10 U. to purify, to wipe मार्जयति—ते pre. मार्जयांचकार—चक्रे perf. मार्जयिता p. fut. अममार्जत्—त aor.

मि 5 U. to throw, to scatter, to bind, to measure, to establish, to perceive, to fix in the earth मिनोति & मिनुते pre. ममौ & मिम्ये perf. माता p. fut. मास्यति—ते fut. अमासीत् & अमास्त aor. मीयात् & मासीष्ट ben. मित्सति—ते des. Pass:—मीयते pre. Cau:— मापयति-ते pre. अमीमपत्-त aor. मित pp.

मिथ् 1 U. to unite, to hurt, to understand, to seize मेथति —ते pre. मिमेथ & मिमिथे perf. मेथिता p. fut.

मिद् 1 A. to be unctuous, to melt, to love मेदते pre. मिमिदे perf. मेदिता p. fut. अमिदत्-अमेदिष्ट aor.

मिद् 4 U. to melt, &c. मेद्यति—ते pre. मिमेद & मिमिदे perf. मेदिता p. fut. अमिदत्—अमेदिष्ट aor.

मिद् 10 U. to melt, &c. मेदयति—ते pre. मेदयांचकार—चक्रे perf. मेदयिता p. fut. अमीमिदत्—त aor.

मिद् 1 U. (see मिथ्) मेथति—ते pre.

मिद् 1 & 10 U. (see मिद् 1 A.) मिदति & मिदयति—ते pre.

मिन्व् 1 P. to sprinkle, to honour मिन्वति pre. मिमिन्व perf.

मिल् 6 U. to join, to be united, to come together मिलति—ते pre. मिमेल—मिमिले perf. मेलिता p. fut. मेलिष्यति—ते fut. अमेलिष्यत्—त con. अमेलीत् or अमेलिष्ट aor. Pass:—मिल्यते pre. अमेलि aor. Cau:—मेलयति—ते pre. अमीमिलत्—त aor. मिलित pp. मिलित्वा ger.

मिश् 1 P. to make a sound or noise, to be angry मेशति pre. मिमेश perf. मेशिता p. fut. अमेशीत् aor.

मिश्र् 10 U. to mix, to mingle मिश्रयति—ते pre. मिश्रयांचकार—चक्रे, &c. perf. मिश्रयिता p. fut. अमिमिश्रत्—त aor. मिश्रित pp. मिश्रयित्वा ger.

मिष् 6 P. to open the eyes, to look at मिषति pre. मिमेष perf. मेषिता p. fut. अमेषीत् aor.

मिष् 1 P. to wet, to sprinkle मेषति pre. &c.

मिह् 1 P. to make water, to wet मेहति pre. मिमेह perf. मेढा p. fut. मेक्ष्यति fut. अमिक्षत् aor. मिमिक्षति des. Cau:—मेहयति—ते pre. अमीमिहत्—त aor. मीढ pp. मीढ्वा ger. मेढुम् inf.

मी 9 U. to kill, to lessen, to change, to be lost मीनाति & मीनीते pre. ममौ & मिम्ये perf. माता p. fut. अमासीत् & अमास्त aor. मीयात् & मासीष्ट ben. मित्सति—ते des. Pass.—मीयते pre. Cau:—मापयति—ते pre. मीत pp. मीत्वा ger.

मी 4 A. to die, to perish मीयते pre.

मी 1 P. & 10 U. to go, to understand मयति & मायवति—ते pre. ममौ & माययांचकार—चक्रे, &c. perf.

मील् 1 P. to close (as the eyes), to twinkle, to be closed or shut (as the eyes or flowers), to meet, to cause to shut मीलति pre. मिमील perf. मीलिता p. fut. अमीलीत् aor.

मीव् 1 P. to go, to move, to grow fat मीवति pre. मिमीव perf. मीविता p. fut. अमीवीत् aor.

मुच् 1 A. to deceive, to cheat मोचते pre. मुमुचे perf.

मुच् 6 U. to loose, to set free, to leave, to abandon मुंचति—ते pre. मुमोच & मुमुचे perf. मोक्ता p. fut. मोक्ष्यति—ते fut. अमुचत् अमुक्त aor. मुच्यात् & मुक्षीष्ट ben. मुमुक्षति des. मुक्त pp. मुक्त्वा ger.

मुज् or मुंज् 1 P. & 10 U. to cleanse, to purify, to sound मोजति—ते, मुंजति—ते & मोजयति—ते & मुंजयति—ते pre. मुमोज, मुमुजे, मुमुंज मुमुंजे, & मोजयांचकार—चक्रे & मुंजयांचकार—चक्रे perf.

मुट् 1 P. to crush, to grind, to kill मोटति pre. मुमोट perf. मोटिता p. fut. अमोटीत् aor.

मुण् 6 P. to promise मुणति pre. मुमोण perf. मोणिता p. fut. अमोणीत् aor.

मुंट् 1 P. to crush, to grind मुंटति pre. मुमुंट perf. मुंटिता p. fut. अमुंटीत् aor.

मुंड् 1 A. to run away मुंडते pre. मुमुंडे perf. मुंडिता p. fut. अमुंडिष्ट aor.

मुंड् 1 P. to shave, to grind मुंडति pre. मुमुंड perf. मुंडिता p. fut. अमुंडीत् aor.

मुंड् 1 A. to sink मुंडते pre. मुमुंडे perf. मुंडिता p. fut. अमुंडिष्ट aor.

मुद् 1 A. to rejoice, to be glad मोदते pre. मुमुदे perf. मोदिता p. fut. मोदिष्यते fut. अमोदिष्ट aor. मोदिषीष्ट ben. मुमुदिषते or मुमोदिषते des. मुदित pp.

मुद् 10 U. to mix, to blend, to purify मोदयति–ते pre. मोदयांचकार—चक्रे perf. मोदयिता p. fut. अमूमुदत्—त aor.

मुंथ् 1 P. to go, to move मुंथति pre. मुमुंथ perf.

मुर्छ् 1 P. to faint, to become senseless, to grow, to prevail, to be a match for मूर्छति pre. मुमूर्छ perf. मूर्छिता p. fut. अमूर्छीत् aor.

मुर्व् 1 P. to bind, to tie मुर्वति pre. मुमुर्व perf. मुर्विता p. fut. अमुर्वीत् aor.

मुल् 10 U. to plant मोलयति—ते pre. मोलयांचकार—चक्रे perf. मोलयिता p. fut. अमूमुलत्—त aor.

मुष् 9 P. to steal, to carry off मुष्णाति pre. मुषाण 2nd sing. Impera. मुमोष perf. मोषिता p. fut. मोषिष्यति fut. अमोषीत् aor. मुष्यात् ben. मुमुषिषति des. मुषित pp. मुषित्वा, सम्मुष्य ger. मोषितुम् inf.

मुस् 4 P. to cleave, to divide मुस्यति pre. मुमोस perf.

मुस्त् 10 U. to heap up, to gather मुस्तयति—ते pre. मुस्तयांचकार —चक्रे perf. मुस्तयिता p. fut. अमुमुस्तत्—त aor.

मुह् 4 P. to faint, to swoon, to fall, to err, to be foolish, मुह्यति pre. मुमोह perf. मोहिता, मोग्धा or मोढा p. fut. मोहिष्यति or मोक्ष्यति fut. अमोहिष्यत्—अमोक्ष्यत् con. अमुहत् aor. मुह्यात् ben. मुमोहिषति or मुमुक्षति des. Pass:—मुह्यते pre. अमोहि aor.

Cau:—मोहयति—ते pre. अमूमुहत्—त aor. मुग्ध or मूढ pp. मोहित्वा मुग्ध्वा मूढ्वा, सम्मुह्य ger. मोहितुम्, मोग्धुम्, मोढुम् inf.

मू 1 A. to fasten, to tie मवते pre.

मूल् 1 U. to be firm, to stand fast मूलति—ते pre. मुमूल or मुमूले perf. मूलिता p. fut.

मूल् 10 U. to plant, to sprout मूलयति—ते pre. मूलयांचकार—चक्रे perf. मूलयिता p. fut. अमूमूलत्—त aor. मूलित pp.

मुष् 1 P. to rob, to plunder मूषति pre. मुमूष perf. अमूषीत् aor. मूषित pp.

मृ 6 A.* to die, to perish म्रियते pre. ममार perf. मर्ता p. fut. मरिष्यति fut. अमृत aor. मृषीष्ट ben. मुमूर्षति des. Pass:-म्रियते pre. Cau:—मारयति—ते pre. अमीमरत्-त aor. मृत pp. मर्तुम् inf. मृत्वा ger.

मृक्ष् 1 P. to strike मृक्षति pre. ममर्क्ष perf.

मृग् 4 P. to seek, to hunt, to examine. to beg मृग्यति pre. ममर्ग perf. मर्गिता p. fut. मर्गिष्यति fut. अमर्गीत् aor. मृगित pp.

मृग् 10 A. to seek, &c मृगयते pre. मृगयांचक्रे perf. मृगयिता p. fut. मृगयिष्यते fut. अममृगत aor.

मृज् 1 P. to sound मार्जति pre. ममार्ज perf.

मृज् 2 P. to wipe off, to rule, to carry (as a horse). to adorn मार्ष्टि pre. ममार्ज perf. मार्जिता or मार्ष्टा p. fut. मार्जिष्यति or मार्क्ष्यति fut. अमार्जिष्यत्-अमार्क्ष्यत् con. अमार्जीत् or अमार्क्षीत् aor. मृज्यात् ben. मिमृक्षति or मिमार्जिषति des. Pass.

---

* It is Parasmaipadi in the perfect, the two futures and the conditional.

—मृज्यते pre. अमार्जि aor. Cau:—मार्जयति—ते pre. मृष्ट मार्जित pp.

मृज् 10 U. to wipe off, &c. मार्जयति—ते pre. मार्जयांचकार—चक्रे, perf. मार्जयिता p. fut. मार्जयिष्यति—ते fut. अममार्जत्—त aor.

मृड् 6 & 9 P. to be gracious, to pardon, to be delighted मृडति and मृड्नाति pre. ममर्ड perf. मर्डिता p. fut. अमर्डीत् aor.

मृण् 6 P. to kill to destroy मृणति pre. ममर्ण perf.

मृद् 9 P. to press, to crush, to kill to rub off मृद्नाति pre. ममर्द perf. मर्दिता p. fut. मर्दिष्यति fut. अमर्दिष्यत् con. अमर्दीत् aor. Pass.—मृद्यते pre. Cau:—मर्दयति—ते pre. अमीमृदत्—त or अममर्दत्—त aor. मृदित pp.

मृध् 1 U. to be moist, to hurt, to kill (in the Vedas) to disregard मर्धति—ते pre. ममर्ध or ममर्धे perf.

मृश् 6 P. to touch, to shake, to consider मृशति pre. ममर्श perf. मर्ष्टा or म्रष्टा p. fut. मर्क्ष्यति or म्रक्ष्यति fut. अमार्क्षीत् अम्राक्षीत् or अमृक्षत् aor. मिमृक्षति des. Pass:—मृश्यते pre. अमर्शि aor. Cau:—मर्शयति—ते pre. अमीमृशत्—त or अममर्शत् —त aor. मृष्ट pp. मृष्ट्वा ger.

मृष् 1 P. to sprinkle मर्षति pre. ममर्ष perf. मर्षिता p. fut. अमर्षीत् aor.

मृष् 1 U. to bear, to sprinkle मर्षति -ते pre. (see the following root for the other forms).

मृष् 4 U. to suffer, to allow, to pardon मृष्यति—ते pre. ममर्ष or ममृषे perf. मर्षिता p. fut. मर्षिष्यति—ते fut. अमर्षीत् or अमर्षिष्ट aor. Pass.—मृष्यते pre. cau:—मर्षयति -ते pre.

मृष् 10 U. to suffer, &c. मर्षयति—ते pre. मर्षयांचकार—चक्रे, perf. मर्षयिता p. fut. अमीमृषत्—त or अममर्षत्-त aor.

मृ 9 P. to hurt, to kill मृणाति pre. ममार perf. मरिता or मरीता p. fut. मरिष्यति or मरीष्यति fut. अमारीत् aor.

मे 1 A. to exchange, to barter मयते pre. ममे perf. माता p. fut. मास्यते fut. अमास्त aor. मासीष्ट ben. मित्सति des. मित pp.

मेद् 1 P. to be mad मेदति pre.

मेड् 1 P. to be mad मेडति pre.

मेथ् 1 U. to meet, to know, to hurt, to meet one another, (in the Atm.) मेथति—ते pre. मिमेथ perf. मेथिता p. fut. अमेथीत् aor.

मेन्ध् 1 U. see the above root.

मेप् 1 P. to go, to move मेपते pre. मिमेपे perf.

मेव् 1 A. to worship, to attend upon मेवते pre.

मोक्ष् 1 P. & 10 U. to release, to loose, to shed मोक्षति & मोक्षयति -ते pre. मुमोक्ष & मोक्षयांचकार—चक्रे perf.

म्ना 1 P. to repeat in the mind, to learn, to remember, to praise (in the Vedás) मनति pre. मम्नौ perf. म्नाता p. fut. म्नास्यति fut. अम्नासीत् aor. म्नायात् or म्नेयात् ben. मिम्नासति des. Cau.:—म्नापयति—ते pre. अमिम्नपत्—त aor. Pass.—म्नायते pre. म्नात pp.

म्रक्ष् 1 P. to rule, to collect, to strike म्रक्षति pre. मम्रक्ष perf. म्रक्षिता p. fut. अम्राक्षीत् aor.

म्रक्ष् 10 U. to heap, to mix, to anoint, to speak indistinctly म्रक्षयति-ते pre. म्रक्षयांचकार—चक्रे perf. म्रक्षयिता p. fut. अमम्रक्षत्—त aor.

म्रद् 1 A. to pound म्रदते pre. मम्रदे perf.

म्रुच् 1 P. to go म्रोचति pre. मुम्रोच perf. अम्रोचीत् aor.

म्रुंच् 1 P. to go म्रुंचति pre.

म्रेट् (ड्) 1 P. to be mad म्रेट (ड) ति pre.

म्लक्ष् 10 U. to cut, to divide म्लक्षयति--ते pre. म्लक्षयांचकार--चक्रे perf. म्लक्षयिता p. fut. अमम्लक्षत्---त aor.

म्लुच् 1 P. to go म्लोचति pre. मुम्लोच perf. म्लोचिता p. fut. म्लोचिष्यति fut. अम्लुचत् or अम्लोचीत् aor.

म्लुंच् 1 P. to go म्लुंचति pre. मुम्लुंच perf.

म्लेच्छ or म्लेछ् 1 P. & 10 U. to speak barbarously म्लेच्छति & म्लेच्छयति---ते pre. मिम्लेच्छ & म्लेच्छयांचकार—चक्रे perf. म्लिष्ट & म्लेच्छित pp.

म्लेट् or म्लेड् 1 P. to be mad म्लेटति or म्लेडति pre.

म्लेव् 1 A. to worship, to serve म्लेवते pre, मिम्लेवे perf.

म्लै 1 P. to fade, to grow weary, to be sad म्लायति pre. मम्लौ perf. म्लाता p. fut. म्लास्यति fut. अम्लासीत् aor. म्लायात् or म्लेयात् ben. Cau:---म्लापयति-ते pre. म्लान pp.

य्.--

यक्ष् 1 P. to stir, to move यक्षति pre. इयक्ष perf. यक्षिता p. fut. अयक्षीत् aor.

यक्ष् 10 A. to honour, to adore यक्षयते pre. यक्षयांचक्रे perf. यक्षयिता p. fut. अययक्षत् aor.

यज् 1 U. to sacrifice, to make an oblation to, to give यजति--ते pre. इयाज or ईजे perf. यष्टा p. fut. यक्ष्यति---ते fut. अयक्ष्यत्-त con. अयाक्षीत् or अयष्ट aor. इज्यात् or यक्षीष्ट ben. यियक्षति des. Pass:--इज्यते pre. अयाजि aor. Cau:---याजयति---ते pre. अयीयजत्---त aor. इष्ट pp. इष्ट्वा ger.

यत् 1 A. to attempt, to strive after, to labour, &c. यतते pre.

येते perf. यतिता p. fut. यतिष्यते fut. अयतिष्ट aor. यतिषीष्ट ben. यियतिषते des. Pass:--यत्यते pre. अयाति aor. Cau:--यातयति --ते pre. अयीयतत्--त aor. यत्त pp. यतित्वा, आयत्य ger.

यन्त्र् 1 U. to restrain, to bind, to force यन्त्रति--ते pre. ययन्त्र perf. यन्त्रिता p. fut. अयन्त्रीत् aor.

यन्त्र् 10 U. to restrain, &c. यन्त्रयति--ते pre. यन्त्रयांचकार--चक्रे, &c. perf. यन्त्रयिता p. fut. यन्त्रयिष्यति--ते fut. अययन्त्रत्--त aor. Pass:--यन्त्र्यते pre. यन्त्रित pp. यन्त्रयित्वा ger.

यभ् 1 P. to cohabit यभति pre. ययाभ perf. यब्धा p. fut. यप्स्यति fut. अयाप्सीत् aor. अयप्स्यत् con.

यम् 1 P. to check, to offer, lift up, to go, to show यच्छति pre. ययाम perf. यन्ता p. fut. यंस्यति fut. अयंस्यत् con. अयंसीत् aor. यम्यात् ben. यियंसति des. Cau: - यमयति--ते pre. अयीयमत् --त aor. Pass.--यम्यते pre. यत pp. यत्वा ger.

यस् 1 & 4 P. to strike, to endeavour यसति & यस्यति pre. ययास perf. यसिता p. fut. यसिष्यति fut. अयसत् aor. Cau:--यासयति--ते pre. यस्त pp यसित्वा, यस्त्वा ger. यसितुम् inf.

या 2 P. to go, to invade, to pass away याति pre. ययौ perf. याता p. fut. यास्यति fut. अयासीत् aor. यायात् ben. यियासति des. Pass.:--यायते pre. Cau.:--यापयति--ते pre. अयीयपत् त aor. यात pp. यात्वा, प्रयाय ger. यातुम् inf.

याच् 1 P. A. to beg, to demand in marriage याचति--ते pre. ययाच--ययाचे perf. याचिता p. fut. याचिष्यति--ते fut. अयाचिष्ट अयाचीत् aor. याचिषीष्ट--याच्यात् ben. Cau:--याचयति--ते pre. अययाचत्--त aor. याचित pp. याचित्वा ger. याचितुम् inf.

यु 2 P. to join, to combine यौति pre. युयाव perf. यविता p.

fut. यविष्यति fut. अयावीत् aor. यूयात् ben. युयूषति or यियविषति des. Pass.—यूयते pre. अयावि aor. Cau:—यावयति—ते pre. युत pp.

यु 8 P. to separate युनोति pre. (see above).

यु 9 U. to join, to mix युनाति or युनीते pre. युयाव or युयुवे perf. योता p. fut. योष्यति—ते fut. अयौषीत् or अयोष्ट aor.

यु 10 A. to censure यावयते pre. यावयांचक्रे perf. यावयिता p. fut.

युज् 7 U. to unite, to put to, to appoint, to give, to prepare, &c. युनक्ति or युंक्ते pre. युयोज or युयुजे perf. योक्ता p. fut. योक्ष्यति—ते fut. अयुजत्, अयौक्षीत् or अयुक्त aor. Pass:—युज्यते pre. Cau:—योजयति—ते pre. अयूयुजत्—त aor. युक्त pp.

युज् 1 P. to unite, &c. योजति pre. युयोज perf. &c.

युज् 10 U. to join, &c. योजयति—ते pre. योजयांचकार—चक्रे, perf. योजयिता p. fut. योजयिष्यति—ते fut. अयूयुजत्—त aor.

युज् 4 A. to concentrate the mind युज्यते pre. युयुजे perf. योक्ता p. fut. योक्ष्यते fut. अयोक्ष्यत con. अयुक्त aor. युक्षीष्ट ben.

युज् 10 A. to censure योजयते pre.

युत् 1 A. to shine योतते pre. युयुते perf.

युध् 4 A. to fight, to conquer in fight युध्यते pre. युयुधे perf. योद्धा p. fut. योत्स्यते fut. अयोत्स्यत con. अयुद्ध aor. युत्सीष्ट ben. Pass:—युध्यते pre. अयोधि aor. Cau:—योधयति—ते pre. अयूयुधत्—त aor. युद्ध pp.

युप् 4 P. to blot out, to trouble, to make smooth युप्यति pre. युयोप perf. योपिता p. fut.

यूष् 1 P. to injure, to kill यूषति pre. युयूष perf.
येष् 1 A. to try, to attempt येषते pre. यियेषे perf.
योट् (ड्) 1 P. to join together योट (ड) ति pre.

र—

रंह् 1 P. to move, to flow रंहति pre. ररंह perf. रंहिता p. fut. अरंहीत् aor. Cau:—रंहयति—ते pre.

रक् 10 U. to get, to taste राकयति—ते pre. राकयिता p. fut. राकयांचकार—चक्रे perf. अरीरकत्—त aor.

रक्ष् 1 P. to protect, to avoid रक्षति pre. ररक्ष perf. रक्षिता p. fut. रक्षिष्यति fut. अरक्षीत् aor. रक्ष्यात् ben. Pass:—रक्ष्यते pre. Cau:—रक्षयति—ते pre. अररक्षत्—त aor. रक्षित pp.

रख् 1 P. to go, to move रखति pre. रराख perf.

रग् 1 P. to doubt रगति pre. रराग perf.

रंग् 1 P. to go, to move रंगति pre. ररंग perf.

रंघ् 1. U. to go quickly रंघति·ते pre. ररंघ—घे perf. रंघिता. p. fut. अरंघीत् अरंघिष्ट aor.

रघ् 10 U. to shine, to speak रंघयति—ते pre. रंघयांचकार—चक्रे perf.

रच् 10 U. to arrange, to make, to write, to adorn, to direct रचयति—ते pre. रचयांचकार—चक्रे perf. रचयिता p. fut. रचयिष्यति—ते fut. अररचत्—त aor. रचित pp. रचयित्वा ger.

रञ्ज् 1 & 4 U. to be coloured, to point, to be pleased, to be devoted to, to be in love with रजति—ते & रज्यति —ते pre. ररञ्ज or ररञ्जे perf. रङ्क्ता p. fut. रङ्क्ष्यति—ते

fut. अरङ्क्ष्यत्--त con. अरांक्षीत् or अरङ्क्त aor. रज्यात् or रंक्षीष्ट ben. रिरंक्षति—ते des. Cau:—to dye, &c. रंजयति-ते pre. अररञ्जत्—त aor:—to hunt deer रजयति—ते pre. अरीरजत् —त aor. Pass.—रज्यते pre. रक्त pp. रङ्क्त्वा, रक्त्वा ger.

रट् 1 P. to shout, to call out, to shout with joy रटति pre. रराट perf. रटिता p. fut. अरटीत् aor. रटित pp.

रठ् 1 P. to speak रठति pre. रराठ perf.

रण् 1 P. to sound, to go, to rejoice (in the Vedas.). रणति pre. रराण perf. रणिता p. fut. अरणीत् aor. रणित pp.

रद् 1 P. to split, to gnaw, to dig रदति pre. रराद perf. रदिता p. fut. रदिष्यति fut. अरदीत् or अरादीत् aor.

रध् 4 P. to hurt, to destroy, to subdue, to become subject to any one, to die and to be completed (in the Vedas.) रध्यति pre. ररन्ध perf. रधिता or रद्धा p. fut. रधिष्यति or रत्स्यति fut. अरधिष्यत्—अरत्स्यत् con. अरधत् aor. Pass:—रध्यते pre. अरन्धि aor, Cau.—रन्धयति—ते pre. अररन्धत् —त aor. रद्ध pp.

रप् 1 P. to speak distinctly, to praise (in Vedas) रपति pre. रराप perf.

रफ् 1 P. to go, to hurt रफति pre. रराफ perf.

रभ् 1 A. to begin, to embrace, to long for, to act rashly रभते pre. रेभे perf. रब्धा p. fut. रप्स्यते fut. अरप्स्यत con. अरब्ध aor. रप्सीष्ट ben. रिप्सते des. Cau:—रम्भयति—ते pre. अररम्भत्—त aor. रब्ध pp.

रम्* 1 A. to play, to rejoice at, to take rest रमते pre. रेमे

* It is Atm. when it is preceded by वि, आ, परि & उप,

perf. रन्ता p. fut. रंस्यते fut. अरंस्यत con. अरंस्त aor. रंसीष्ट ben. रिरंसते des. Pass:—रम्यते pre. Cau:—रमयति—ते pre. अरीरमत्—त aor. रत pp. रत्वा आरम्य, आरत्य ger.

रम्भ् 1 A. to sound, to bellow, to low (as a cow) रम्भते pre. ररम्भे perf.

रय् 1 A. to go, to move रयते pre. रेये perf. रयिता p. fut. अरयीत् aor. रयित pp.

रस् 1 P. to roar, to make a noise, to sing, to praise (in the Vedas) रसति pre. ररास perf. रसिता p. fut. अरसीत् aor. रसित pp.

रस् 10 U. to taste, to feel रसयति—ते pre. रसयांचकार—चक्रे perf. अरीरसत्—त aor.

रह् 1 P. to quit, to desert रहति pre. रराह perf. रहिता p. fut. रहिष्यति fut. अरहीत् aor.

रह् 10 U. to leave, to abandon रहयति—ते pre. रहयांचकार—चक्रे perf. रहयिता p. fut. रहयिष्यति—ते fut. अररहत्—त aor. रहित pp. रहयित्वा ger.

रा 2 P. to give, to bestow राति pre. ररौ perf. राता p. fut.

राख् 1 P. to be dry, to adorn, to be able, to suffice राखति pre. रराख perf.

राघ् 1 A. to be able राघते pre. रराघे perf.

राज् 1 U. to shine, to glitter, to appear, to direct, to be at the head राजति—ते pre. रराज, रराजे or रेजे perf. राजिता p. fut. राजिष्यति-ते fut. अराजीत् or अराजिष्ट aor. राज्यात् or राजिषीष्ट ben. रिराजिषति-ते des. राजित pp. राजित्वा, विराज्य ger.

राध् 5 P. to propitiate, to perform, to destroy राध्नोति pre. रराध perf. राद्धा p. fut. रात्स्यति fut. अरात्स्यत् con. राध्यात् ben. अरात्सीत् aor.

राध् 4 P. to be favourable राध्यति pre. (for the other forms see the above root).

रास् 1 A. to cry, to yell, to sound रासते pre. ररासे perf.

रि 6 P. to go, to move रियति pre.

रि 5 P. to hurt रिणोति pre.

री 9 U. to drive out, to expel, to go, to hurt, to emit, to separate, (in the Vedas) रिणाति, रिणीते pre.

रिख् or रिङ्ग् 1 P. to crawl, to creep, to go slowly रिखति or रिङ्गति pre. रिरेख or रिरिङ्ग perf.

रिच् 7 U. to empty, to clear, to deprive of, to give up रिणक्ति or रिङ्क्ते pre. रिरेच or रिरिचे perf. रेक्ता p. fut. रेक्ष्यति--ते fut. अरेक्ष्यत्—त con. अरिचत्, अरैक्षीत् or अरिक्त aor. रिच्यात् or रिक्षीष्ट ben. Pass.—रिच्यते pre. अरेचि aor. Cau:-रेचयति—ते pre. अरीरिचत्—त aor. रिक्त pp. रिक्त्वा ger.

रिच् 1 & 10 P. to divide, to leave रेचति & रेचयति pre. रिरेच & रेचयांचकार perf. रेचित pp.

रिज् 1 A. to fry, to parch रेजते pre. रिरिजे perf.

रिफ् 6 P. to boast, to speak, to give, to fight, to utter a rough grating sound रिफति pre. रिरेफ perf. रेफिता p. fut. अरेफीत् aor. रिफित pp.

रिभ् 1 A. to crackle, to murmur, to chatter रेभते pre. रिरिभे perf.

रिम्फ् 6 P. to hurt, to kill रिम्फति pre. रिरिम्फ perf. रिम्फिता p. fut. अरिम्फीत् aor.

रिश् 6 P. to tear, to feed on, to injure रिशति pre. रिरेश perf. रेष्टा p. fut. रेक्ष्यति fut. अरेक्ष्यत् con. अरिक्षत् aor.

रिष् 1 & 4 P. to kill, to fail, to perish or to be injured in 4th. रेषति & रिष्यति pre. रिरेष perf. रेषिता or रेष्टा p. fut. रेषिष्यति fut. अरेषीत् (1st cl.) अरिषत् (the 4th cl.) aor. रिष्ट pp.

रिह् 1 P. to hurt रेहति pre. रिरेह perf.

री 4 A. to tickle, to ooze, to flow रीयते pre. रिरिये perf.

री 9 U. to go, to injure, to howl रिणाति or रिणीते pre. रीण pp.

रीव् 1 U. to take, to cover रीवति—ते pre.

रु 2 P. to cry, to yell, to hum as bees, to sound in general रौति or रवीति pre रुराव perf. रविता p. fut. रविष्यति fut. अरावीत् aor. रूयात् ben. रुरूषति des. Pass:—रूयते pre. Cau:—रावयति—ते pre. रुत pp.

रु 1 A. to go, to hurt, to break to pieces (in the Vedas) रवते pre. रुरुवे perf. रविता p. fut. अरविष्ट aor. Cau:—रावयति—ते pre. अरीरवत्—त aor.

रुच् 1 A. to shine, to look beautiful, to be pleased with (a person) रोचते pre. रुरुचे perf. रोचिता p. fut. रोचिष्यते fut. अरुचत् or अरोचिष्ट aor. रुरुचिषते or रुरोचिषते des. Cau:—रोचयति—ते pre. अरूरुचत्—त aor. रुचित pp.

रुज् 6 P. to break to pieces, to afflict, to pain रुजति pre. रुरोज perf. रोक्ता p. fut. रोक्ष्यति fut. अरौक्षीत् aor. रुग्ण pp. रुक्त्वा ger.

रुज् 10 U. to hurt, to kill रोजयति—ते pre. रोजयांचकार—चक्रे perf. रोजयिता p. fut. अरूरुजत्—त aor.

रुट् 1 A. to strike down. रोटते pre. रुरुटे perf.

रुट् 10 U. to obstruct, to resist, to shine, to speak रोटयति—ते pre. रोटयांचकार—चक्रे perf.

रुठ् 1 P. to strike रोठति pre. रुरोठ perf.

रुठ् 1 A. to resist, to oppose, to torment, to suffer pain रोठते pre. रुरुठे perf.

रुंट् 1 P. to rob, to steal, रुंटति pre. रुरुंट perf.

रुंठ् 1 P. to go, to steal, to tame, to oppose रुंठति pre. रुरुंठ perf.

रुद् 2 P. to cry, to weep, to roar रोदिति pre. रुरोद perf. रोदिता p. fut. अरुदत् or अरोदीत् aor. रुद्यात् ben. रुरुदिषति des. Pass:— रुद्यते pre. अरोदि aor. Cau:—रोदयति-ते pre. अरूरुदत्—त aor. रुदित pp.

रुध् 7 U. to oppose, to hold up, to bind, to hide, to oppress रुणद्धि or रुन्द्धे pre. रुरोध or रुरुधे perf. रोद्धा p. fut. रोत्स्यति—ते fut. अरुधत्, अरौत्सीत् or अरुद्ध aor. रुध्यात् or रुत्सीष्ट ben. रुरुत्सति—ते des. Pass:—रुध्यते pre. अरोधि aor. Cau:—रोधयति—ते pre. अरूरुधत्—त aor. रुद्ध pp.

रुप् 4 P. to confound, to suffer violent pain (in the Vedas.) रुप्यति pre. रुरोप perf. अरोपीत् aor.

रुश् 6 P. to hurt, to destroy रुशति pre. रुरोश perf.

रुष् 4 P. (rarely A.) to be angry, to be annoyed रुष्यति pre. रुरोष perf. रोषिता or रोष्टा p. fut. अरुषत् aor. रुष्ट pp.

रुष् 1 P. to hurt, to vex, to be offended (in the Vedas) रोषति pre. अरोषीत् aor. (for the other forms see the above root).

रुह् 1 P. to grow, to increase, to rise, to reach रोहति pre. रुरोह perf. रोढा p. fut. रोक्ष्यति fut. रुह्यात् ben. अरुक्षत् aor. रूढ pp.

रूक्ष् 10 U. to be rough, to be unkind, to make dry (in the Vedas) रूक्षयति—ते pre. रूक्षयांचकार-चक्रे perf. रूक्षयिता p. fut. अरुरूक्षत्—त aor.

रूप् 10 U. to find out, to form, to consider, to fix, to appoint रूपयति—ते pre. रूपयांचकार—चक्रे perf. रूपयिता p. fut. अरुरूपत्—त aor.

रूष् 1 P. to adorn, to decorate, to anoint रूषति pre. रुरोष perf. रोषिता p. fut. अरोषीत् aor. रूषित pp.

रेक् 1 A. to doubt, to suspect रेकते pre. रिरेके perf.

रेज् 1 A. to shine, to shake रेजते pre.

रेट् 1 U. to speak, to ask रेटति—ते pre.

रेप् 1 A. to go रेपते pre.

रेब् (व्) 1 A. to go, to jump रेब (व) ते pre.

रेभ् 1 A. to sound, to low रेभते pre.

रेष् 1 A. to roar, to neigh रेषते pre. रिरेषे perf. रेषिता p. fut. अरेषीत् aor. रेषित pp.

रै 1 P. to sound, to bark at रायति pre.

रोड् 1 P. to despise रोडति pre.

रौट् (ड्) 1 P. to despise रौट (ड) ति pre.

ल—

लक् 10 U. to taste, to obtain लाकयति—ते pre. लाकयांचकार—चक्रे perf. लाकयिता p. fut. अलीलकत्—त aor.

लक्ष् 1 A. to perceive, to observe लक्षते pre. ललक्षे perf. लक्षिता p. fut. अलक्षिष्ट aor.

लक्ष् 10 U. to notice, to define, to regard लक्षयति—ते pre. लक्षयांचकार—चक्रे, &c. perf. लक्षयिता p. fut. अललक्षत्—त aor. लक्षित pp.

लख् or लंख् 1 P. to go लखति or लंखति pre.

लग् 1 P. to attach, oneself to, to touch, to meet, to follow closely लगति pre. ललाग perf. लगिता p. fut. अलगीत् aor. लग्न pp.

लग् 10 U. to taste, to obtain लागयति—ते pre. लागयांचकार—चक्रे perf. लागयिता p. fut. अलीलगत्—त aor.

लंग् 1 P. to go, to go lame लंगति pre.

लंघ् 1 U. to spring, to leap, to go, to mount upon, to dry, to eat up, to lessen लंघति—ते pre. ललंघ—घे perf. लंघिता p. fut. अलंघीत् or अलंघिष्ट aor. लंघित pp.

लछ् 1 P. to mark लच्छति pre. ललच्छ perf.

लज् 6 A. to be ashamed लजते pre. लेजे perf. लजिता p. fut. अलजिष्ट aor. लग्न pp.

लज् 1 P. to blame लजति pre. ललाज perf. लजिता p. fut. अलजीत् aor.

लज् 10 P. to seem, to appear, to conceal लाजयति (लजयति according to some in the sense of to conceal, to cover) pre. लजयांचकार perf. लजयिता p. fut. अलीलजत् aor.

लज्ज् 6 A. to be ashamed, to blush लज्जते pre. ललज्जे perf. लज्जिता p. fut. अलज्जिष्ट aor. लज्जित pp.

लंज् 1 P. to censure, to strike, to kill लंजति pre. ललंज perf.

लंज् 10 U. to injure, to speak, to give, to be powerful, to shine, to dwell लंजयति—ते pre. लंजयांचकार—चक्रे perf. लंजयिता p. fut.

लट् 1 P. to act like a child, to prattle, to cry लटति pre. ललाट perf.

लड् 1 P. to play, to sport लडति pre.

लड् 1 & 10 P. to throw, to blame, to harass लडति & लाडयति pre. ललाड & लाडयांचकार &c. perf.

लड् 10 U. to fondle, to caress, to annoy लाडयति—ते pre. लाडयांचकार—चक्रे perf.

लप् 1 P. to talk in general, to wail, to whisper, to lament लपति pre. ललाप perf. लपिता p. fut. अलपीत् or अलापीत् aor. Caus:—लापयति—ते pre. अलीलपत्—त aor. लपित pp.

लभ् 1 A. to get, to take, to have, to be able, &c. लभते pre. लेभे perf. लब्धा p. fut. लप्स्यते fut. अलब्ध aor. लिप्सते des. लब्ध pp.

लम्ब् 1 A. to hang down, to stick to, to sink, &c. लम्बते pre. ललम्बे perf. लम्बिता p. fut. अलम्बिष्ट aor. Pass.—लम्ब्यते pre. अलम्बि aor. Caus:—लम्बयति—ते pre. अललम्बत्—त aor. लम्बित pp.

लय् 1 A. to go, to move लयते pre. लेये perf. लयिता p. fut.

लर्ब् 1 P. to go, move लर्बति pre. ललर्ब perf.

लल् 1 U. to play, to move about ललति—ते pre. ललाल or लेले perf. Caus:—लालयति—ते pre. ललित pp.

लल् 10 U. to fondle, to desire लालयति—ते pre. लालयांचकार—चक्रे perf. लालयिता p. fut. अलीललत्—त aor.

लश् 10 U. to excite any art लाशयति—ते pre. लाशयांचकार—चक्रे perf.

लष् 1 & 4 U. to wish, to long for लषति—ते & लष्यति—ते pre. ललाष or लेषे perf. लषिता p. fut. अलषीत्, अलाषीत् or अलषिष्ट aor. लषित pp.

लस् 10 U. to be eager for लासयति—ते pre.

लस् 1 P. to shine, to play, to appear, to embrace, to sound लसति pre. ललास perf. लसिता p. fut. अलसीत्—अलासीत्

aor. Cau:—लालयति—ते pre. अलीललत्-त aor. लालित pp.

लज्ज् 1 A. to be ashamed, to blush लज्जते pre. ललज्जे perf. लज्जिता p. fut. अलज्जिष्ट aor. Pass:—लज्ज्यते pre. Cau:—लज्जयति—ते pre. अललज्जत्-त aor. लग्न pp.

ला 2 P. to take, to obtain लाति pre. ललौ perf. लाता p. fut.

लाख् 1 P. to be dry, to adorn, to suffice लाखति pre.

लाघ् 1 A. to be equal to लाघते pre.

लाज् or लांज् 1 P. to blame लाजति or लांजति pre.

लाञ्छ् 1 P. to mark लाञ्छति pre.

लिख् 6 P. to write, to rub, to touch, to peck as a bird लिखति pre. लिलेख perf. लेखिता p. fut. अलेखीत् aor. लिलिखिषति or लिलेखिषति des. लिखित pp. लिखित्वा or लेखित्वा ger.

लिख् 1 P to go, to move लिखति pre.

लिग् 1 P. to go, to move लिगति pre. लिलिग perf. लिगिता p. fut. अलिगीत् aor. लिगित pp.

लिङ्ग् 10 U. to paint, to inflict (a noun) लिङ्गयति–ते pre. लिङ्गयांचकार–चक्रे &c. perf. लिङ्गयिता p. fut. अलिलिङ्गत्—त aor.

लिप् 6 U. anoint, to cover, to stain, to kindle लिम्पति–ते pre. लिलेप or लिलिपे perf. लेप्ता p fut. अलिपत् or अलिप्त aor. Cau:—लेपयति ते pre. अलीलिपत्—त aor. लिप्त pp.

लिश् 6 P. to go, to hurt लिशति pre. लिलेश perf..

लिश् 4 U. to become small लिश्यति–ते pre.

लिह् 2 U. to lick, to taste लेढि or लीढे pre. लिलेह or लिलिहे perf. लेढा p. fut. लेक्ष्यति–ते fut. अलिक्षत्–त or अलीढ aor. लिह्यात् or लिक्षीष्ट ben. लिलिक्षति—ते des. लीढ pp.

ली 1 P. to melt, to dissolve लयति pre. लिलाय perf.

ली 4 A. to stick, to lie on लीयते pre. लिल्ये perf. लेता or लाता p. fut. लेष्यते or लास्यते fut. अलेष्ट or अलास्त aor. लेषीष्ट or लासीष्ट ben. लीन pp.

ली 9 P. to adhere, to melt लिनाति pre. लिलाय or लली perf. लेता or लाता p. fut. लेष्यति or लास्यति fut, अलैषीत् or अलासीत् aor.

लुञ्च् 1 P. to pluck, to pull, to tear off लुञ्चति pre. लुलुञ्च perf. लुञ्चिता p. fut. अलुञ्चीत् aor. लुंचित pp.

लुट् 1 A. to oppose, to shine, to suffer pain लोटते pre. लुलुटे perf. लोटिता p. fut. अलुटत् or अलोटिष्ट aor.

लुट् 1 P. to roll, to wallow on the ground, to take away लोटति pre. लुलोट perf. लोटिता p. fut. अलोटीत् aor. लुलुटिषति or लुलोटिषति des. Cau:—लोटयति—ते pre. अलूलुटत्—त or अलुलोटत्—त aor.

लुट् 4 P. to roll, &c. लुट्यति pre. लुलोट perf. लोटिता p. fut. अलुटत् aor. (see the above for the othe. forms).

लुट् 10 U. to speak, to shine लोटयति—ते pre. लोटयांचकार—चक्रे &c. perf. लोटयिता p. fut.

लुड् 1 P. to srike, to knock down लोडति pre. लुलोड perf. लोडिता p. fut. अलोडीत् aor. Cau:— अलूलुडत्—त or अलुलो-डत्—त aor.

लुठ् 1 A. to go, to roll on the ground, to oppose लोठते pre. लुलुठे perf. लोठिता p. fut. अलुठत्—अलोठिष्ट aor.

लुठ् 6 P. to wallow लुठति pre. लुलोठ perf.

लुठ् 10 U. to rob, to plunder लोठयति—ते pre. लोठयांचकार—चक्रे perf. अलूलुठत्—त aor.

लुड् 1 P. to stir, to churn लोडति pre. लुलोड perf. लोडिता p. fut. अलोडीत् aor. Cau:—लोडयति—ते pre.

लुड् 6 P. to cover, to adhere लुडति pre. (see the above root for the other forms.)

लुंट् 1 P. to go, to rob, to be lazy लुंटति pre. लुलुंट perf.

लुंट् 10 A. to rob, to disregard लुंटयति—ते pre.

लुंठ् 1 P. to go, to be idle, to agitate लुंठति pre.

लुंड् 10 U. to plunder लुंडयति—ते pre. लुंडयांचकार—चक्रे perf.

लुंथ् 1 P. to strike, to kill लुंथति pre. लुलुंथ perf.

लुप् 4 P. to confound, to be destroyed, लुप्यति pre. लुलोप perf. लोपिता p. fut. अलोपीत् aor.

लुप् 6 U. to break, to take away, to seize, to suppress, लुंपति —ते pre. लुलोप or लुलुपे perf. लोप्ता p. fut. अलुपत् or अलुप्त aor. लुप्यात् or लुप्सीष्ट ben. लुलुप्सति or लुलोपिषति des. Pass:- लुप्यते pre. अलोपि aor. Cau:—लोपयति—ते pre. अलूलुपत्-त or अलुलोपत्—त aor. लुप्त pp.

लुभ् 6 P. to perplex लुभति pre. लुलोभ perf.

लुभ् 4 P. to covet, to be perplexed लुभ्यति pre. लुलोभ perf. लोभिता, लोब्धा p. fut. अलुभत् aor. Cau:— लोभयति—ते pre. लुब्ध pp.

लुल् 1 P. to roll, to shake लोलति pre. लुलोल perf. लोलिता p. fut. अलोलीत् aor. लोलित pp.

लुष् 1 P. to adorn, to decorate लोषति pre.

लुह् 1 P. to covet, to desire लोहति pre. लुलोह perf.

लू 9 U. to divide, to cut off लुनाति or लुनीते pre. लुलाव or लुलुवे perf. लविता p. fut. अलावीत् or अलविष्ट aor. लूयात् or लविषीष्ट ben. लुलूषति—ते des. Cau:—लावयति—ते pre. लून pp.

लूष् 1 P. (see लुष्) लूषति pre. लुलूष perf.

लूष् 10 U. to injure, to rob लूषयति—ते pre. लूषयांचकार—चक्रे perf.

लेपृ 1 A. to go, to worship लेपते pre.

लैगृ 1 P. to go, to send, to embrace लैगति pre.

लोकृ 1 A. to see, to perceive लोकते pre. लुलोके perf. लोकिता p. fut. अलोकिष्ट aor. लोकित pp.

लोकृ 10 U. to behold, to shine, to know, to seek लोकयति—ते pre. लोकयांचकार—चक्रे perf. लोकयिता p. fut. अलुलोकत्—त aor.

लोचृ 1 A. to see लोचते pre. लुलोचे perf. लोचिता p. fut. अलोचिष्ट aor. लोचित pp.

लोचृ 10 U. to speak, to shine लोचयति—ते pre. लोचयांचकार-चक्रे—आस बभूव perf. लोचयिता p. fut. अलुलोचत्—त aor.

लोटृ 1 P. to be mad or foolish लोटति pre. लुलोट perf.

लोष्टृ 1 A. to heap up लोष्टते pre. लुलोष्टे perf.

लौडृ 1 P. to be mad or foolish लौडति pre.

व—

वक्कृ 1 A. to go, to move वक्कते pre.

वक्षृ 1 P. to grow, to be powerful, to be angry वक्षति pre. ववक्ष perf.

वखृ or वंखृ 1 P. to go, to move वखति or वंखति pre.

वंकृ 1 P. to go वंकति pre.

वंग 1 P. to go, to lame वंगति pre.

वचृ 2 P. to speak, to relate वक्ति pre. उवाच perf. वक्ता p. fut. वक्ष्यति fut. अवोचत् aor. उच्यात् ben. विवक्षति des. Caus.- वाचयति—ते pre. अवीवचत्—त aor.

वचृ 10 U. to speak, to read वाचयति—ते pre. वाचयांचकार—चक्रे,. &c. perf. वाचयिता p. fut. अवीवचत्—त aor. वाचित pp.

व्रज् 1 P. to go, to roam about व्रजति pre. ववाज perf. व्रजिता p. fut.

व्रज् 10 U. to trim, to go वाजयति—ते pre. वाजयामास, &c perf,

वंच् 1 P. to go, to arrive at वंचति pre. ववंच perf. वंचिता p. fut. अवंचीत् aor. वंचित pp.

वंच् 10 A. to cheat वंचयते pre. वंचयामास, &c perf. अववञ्चत aor.

वट् 1 P. to surround. वटति pre. ववाट perf.

वट 10 U. to till, to divide, to surround वटयति—ते pre. वाटयांचकार-चक्रे perf,

वढ् 1 P. to be strong, to be fat वढति pre, ववाढ perf.

वण् 1 P. to sound वणति pre.

वंट् 1 P. & 10 U. to divide वंटति & वंटयति—ते pre.

वद् 1 P. to say, to tell, to lay down वदति pre. उवाद perf. वदिता p. fut. अवादीत् aor. विवदिषति des. उदित pp.

वद् 1 U. to inform वदति—ते pre. उवाद or ऊदे perf. अवादीत् or अवदिष्ट aor.

वध् 1 P. to slay, to kill वधति pre. ववाध perf. वधिता p. fut.

वन 1 P. to honour, to aid, to sound, to be occupied वनति pre. ववान perf.

वन् 8 U. to beg, to seek for, to conquer वनोति or वनुते pre. ववान or वेने perf.

वन् 1 P. & 10 U. to favour, to injure, to sound वनति & वानयति—ते pre.

वन्द् 1 A. to salute, to adore वन्दते pre. ववन्दे perf. वन्दिता p. fut. अवन्दिष्ट aor. वन्दित pp.

वप् 1 U. to sow, to scatter, to throw, to weave, to shave

वपति—ते pre. उवाप or ऊपे perf. वप्ता p. fut. अवाप्सीत् or अवाप्त aor. उप्यात् or वप्सीष्ट ben. Pass:—उप्यते pre.

वभ्र् 1 P. to go वभ्रति pre.

वम् 1 P. to vomit, to pour out, to throw out, to reject वमति pre. ववाम perf. वमिता p. fut. अवमीत् aor. Cau:—वामयति or वमयति pre. अवीवमत् aor. वान्त pp.

वय् 1 A. to go वयते pre.

वर् 10 U. to ask for, to seek, to get वरयति—ते pre. वरयांचकार—चक्रे perf. वरयिता p. fut. अवीवरत्—त aor.

वर्च् 1 A. to shine, to be bright वर्चते pre. ववर्चे perf.

वर्ण् 10 U. to colour, explain, to extol, to send. to grind वर्णयति—ते pre. वर्णयांचकार—चक्रे—मास—बभूव perf. वर्णयिता p. fut. अववर्णत्–त aor. वर्णित pp.

वर्ध् 10 U. to cut, to fill वर्धयति -ते pre.

वर्ह् 1 P. to go, to kill वर्हति pre.

वल्क् 10 U. to speak वल्कयति–ते pre. वल्कयांचकार-चक्रे perf.

वल्ग् 1 U. to go, to dance, to be pleased, to eat वल्गति-ते pre. ववल्ग or ववल्गे perf. वल्गिता p. fut. अवल्गीत्, अवल्गिष्ट aor. वल्गित pp.

वल्यु (ल्यू) ल् 10 U. to cut off, to purify वल्यु (ल्यू) लयति—ते pre.

वल्ल् 1 A. to go, to cover or be covered वल्लते pre. ववल्ले perf.

वल्ह् 1 A. to be preeminent, to kill, to give, to speak वल्हते pre. ववल्हे perf.

वल्ह् 10 U. to speak, to shine वल्हयति-ते pre. वल्हयांचकार-चक्रे perf.

वश् 2 P. to wish, to favour, to shine वष्टि pre. उवाश perf. वशिता p. fut. अवशीत् or अवाशीत् aor. उश्यात् ben. Pass:-उश्यते pre.

वष् 1 P. to injure, to kill वषति pre. ववाष perf.

वस् 1 P. to dwell, to be, to spend (time) वसति pre. उवास perf. वस्ता p. fut. अवात्सीत् aor. उष्यात् ben. विवत्सति des. Pass:—उष्यते pre. Cau:—वासयति—ते pre. अवीवसत्—त aor. उषित pp.

वस् 2 A. to wear, to put on वस्ते pre. ववसे perf. वसिता p. fut. अवसिष्ट aor. वसित pp.

वस् 4 P. to be straight, to be firm, to fix वस्यति pre.

वस् 10 U. to cut, to love, to take, to heat, to scent, to purfume वासयति—ते pre.

वस्क् 1 A. to go वस्कति pre.

वस्त् 10 U. to hurt, to kill, to ask, to go वस्तयति—ते pre. वस्तयांचकार—चक्रे perf.

